दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लप्रतिपदा
श्रावण 01 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-265 | 1 | जुलाई 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 कौशलपारिस्थितिकी-तन्त्रस्य निर्माणाय विश्वासः, गुणवत्ता, आजीवनशिक्षणं च आवश्यकम् - केन्द्रीयमन्त्री जयन्तः चौधरी

3 मुख्यमन्त्री सुक्खूः अवदत्- निर्धनानां भूमिहीनानां च जनानाम् अतिक्रमण-प्रकरणेषु शिथिलतार्थं निर्मास्यामः नीतिम्

5 'विश्वपटले कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः स्वकीयं विशिष्टं परिचयं स्थापयेत्'- डॉ. पंकजचान्दे:

## विदेशमन्त्री डॉ. जयशंकरः यूरोपीयसङ्घस्य स्टार्टअप-अनुसन्धान-नवाचार-आयुक्तेन सह मिलितवान्



हिमसंस्कृतवार्ता। विदेशमन्त्री सुब्रह्मण्यमजयशंकरः बेल्जियमदेशस्य ब्रसेल्सनगरे यूरोपीयसङ्घस्य स्टार्टअप-अनुसन्धान-नवाचार-आयुक्तेन एकातरीना-जहरीवा-महोदयया सह मिलितवान्। डॉ. जयशंकरः अवदत् यत् स्वच्छ-हरित-ऊर्जा-प्रौद्योगिकीषु शोध-अवकाशानां विषये चर्चा कृता। सः अवदत् यत् नवाचारकेन्द्राणि, स्टार्टअप्स, होराइजन यूरोप इत्यनेन सह सहकार्यं च चर्चा कृता । बेल्जियमदेशस्य द्विदिवसीययात्रायाः कालखण्डे डॉ. जयशङ्करः उपप्रधानमन्त्री विदेशमन्त्री च मैक्सिम प्रीवोट् इत्यनेन सह ब्रुसेल्स्-नगरे भारत-बेल्जियम-रणनीतिक-संवादस्य उद्घाटनसत्रस्य सह-अध्यक्षतां कृतवान् । द्विपक्षीयसम्बन्धविस्तारं भारत-यूरोपीयसङ्घस्य सहकार्यस्य प्रवर्धनं च विषये चर्चाः केन्द्रीकृताः आसन् । सः अवदत् यत् राजनैतिक, आर्थिक, निवेश, स्वच्छ ऊर्जा, रक्षा, गतिशीलता, औषधक्षेत्रेषु च सहकार्यस्य समीक्षा कृता। सत्रे बन्दरगाहेषु, समुद्रीयपरिवहनेषु, अर्धचालकक्षेत्रे च अवसरानां अन्वेषणस्य, आपूर्तिशृङ्खलायां व्यापकसहकार्यस्य च चर्चा अभवत् । पक्षद्वयं पश्चिम एशिया सहितं वैश्विकविकासानां विषये चर्चां कृतवन्तौ । ततः पूर्वं डॉ. जयशंकरः अन्तार्राष्ट्रीयसहयोगीविषये यूरोपीय आयुक्तेन जोसेफ् सिकेला इत्यनेन सह अपि मिलितवान् । द्वयोः नेतारयोः गतिशीलतायाः, त्रिपक्षीयसहयोगं च अधिकं सुदृढीकरणस्य विषये चर्चा अभवत् ।

## प्रधानमन्त्री मोदी भारतस्य प्रथमं 'हाइड्रोजन' रेलयानं हरितपताकां प्रदर्श्य प्रस्थापयिष्यति

हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्रमोदी आगामिनि शुक्रे वासरे हरियाणायाः जीन्द-रेलस्थानकात् जीन्द-सोनीपतयोः मध्ये प्रचलन्तीं भारतस्य प्रथमां 'हाइड्रोजन' (जलजनकरूपेण सञ्चालिताम्) रेलयानां हरितपताकां प्रदर्श्य प्रस्थापयिष्यति। श्रीमोदी जीन्दस्य एकलव्यक्रीडाङ्गणे प्रायः चतुर्दशसहस्र-सप्तशतकोटि (14,700 कोटि) रूप्यकाणां विभिन्नविकासपरियोजनानां शिलान्यासं लोकार्पणं च विधास्यति। प्रधानमन्त्रिवर्यः अपराह्णे चण्डीगढे स्वास्थ्यसेवा-शिक्षा-मार्गसंरचनादिभिः सम्बद्धानां षट्-सहस्र-षट्शतकोटि (6,600 कोटि) रूप्यकाभ्यः अधिकानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च करिष्यति। श्रीमोदी चण्डीगढस्थे स्नातकोत्तर-चिकित्सा-शिक्षा-अनुसन्धान-संस्थाने (PGIMER) आधुनिक-मातृ-शिशु-केन्द्रस्य तथा 'एडवांस्ड न्यूरोसाइंसेज' केन्द्रस्य अपि उद्घाटनं विधास्यति।



यात्रिणां सौविध्याय तथा च क्षेत्रस्य आर्थिकविकासस्य गत्यै प्रधानमन्त्री जालन्धरे पञ्चसहस्र-चतुःशत-सप्ततिकोटि (5,470 कोटि) रूप्यकाभ्यः अधिकानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च करिष्यति। श्रीमोदी 'अमृत भारत स्टेशन' योजनान्तर्गतं जालन्धर-कैण्ट-सहितं पञ्चसप्तति (75) पुनर्विकसितानां रेलस्थानकानां देशाय समर्पणम् (लोकार्पणम्) अपि विधास्यति।

## सोनम-वाङ्चुकस्य अनशनसमापनाय जनहितयाचिका - देहली-उच्चन्यायालयेन केन्द्र-राज्यसर्वकारयोः कृते निर्देशिका प्रेषिता

सोनम-वाङ्चुकस्य अनशनं समापयितुं प्रस्तुतां जनहितयाचिकां (PIL) स्वीकृत्य देहली-उच्चन्यायालयेन केन्द्रसर्वकाराय तथा राज्यसर्वकाराय (देहलीसर्वकाराय) निर्देशिका प्रेषिता अस्ति। अष्टादश (१८) दिनेभ्यः अनशनं कुर्वाणस्य वाङ्चुकस्य प्रकरणम् 'अत्यावश्यकम्' (अर्जेंट) मत्वा मुख्यन्यायाधीशस्य देवेन्द्रकुमार-उपाध्यायस्य तथा न्यायाधीशस्य तेजस-करिया महोदयस्य पीठेन केन्द्र-देहलीसर्वकाराभ्यां गुरुवासरस्य प्रातःकालपर्यन्तं स्वोत्तरं प्रदातुं कथितम्।याचिकाकर्ता अधिवक्ता राकेशकुमारसैनी अवदत् यत् इयं महती दुर्भाग्यपूर्णा स्थितिः अस्ति। एकः सामाजिककार्यकर्ता स्वकीयं मौलिकमधिकारं प्रयुञ्जानः प्रदर्शनं करोति, एकप्रकारेण च समग्रदेशस्य समक्षं स्वप्राणान् पणीकरोति। सैनी महोदयः न्यायालयं न्यवेदयत् यत् सः केन्द्र-राज्यसर्वकारयोः कृते निर्देशं दद्यात् यत् वाङ्चुकः अविलम्बं चिकित्सालयं स्थानान्तरणीयः, तस्मै आवश्यकं भौषधोपचारं प्रदाय अनशनं च समापनीयम्। अस्मिन् विषये न्यायालयेन उक्तं यत् केन्द्रसर्वकारस्य पक्षतः कोऽपि उपस्थितः नास्ति। वयम् अस्याः याचिकायाः संज्ञानं गृह्णीमः। वयम् अस्य प्रकरणस्य श्रवणं गुरुवासरे एव करिष्यामः, अतः केन्द्रसर्वकारस्य उत्तरम् आवश्यकम् अस्ति। न्यायालयेन आदेशस्य एका प्रतिलिपिः सम्बद्धाय अतिरिक्त-सॉलिसिटर-जनरल महोदयाय तथा देहलीसर्वकारस्य अधिवक्त्रे प्रदातुं निर्दिष्टा।

### दिनद्वयं यावत् अनशनं प्रचलति चेत् मृत्युः भवितुं शक्नोति

'नीट' (NEET) परीक्षायाः प्रश्नपत्र-प्रकटनाव्यवस्थायाः (लीक) कारणात् 'कॉकरोच जनता पार्टी' केन्द्रीय-शिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य त्यागपत्रस्य याचनां करोति। सोनम-वाङ्चुकः अस्मिन् एव मञ्चे जूनमासस्य अष्टाविंशति (२८) दिनाङ्कात् अनशनं प्रारब्धवान्। अष्टादश (१८) दिनेभ्यः परं तस्य भारः प्रायः सार्ध-अष्टकिलोग्राम् परिमितः न्यूनः जातः अस्ति। सः सहायताप्राप्त्यन्तरमपि महता कष्टेन नित्यकर्मार्थं गन्तुं शक्नोति। विदुषां (विशेषज्ञानां) कथनम् अस्ति यत् यदि दिनद्वयाभ्यन्तरे तस्य अनशनं न समाप्यते, तर्हि तस्य मृत्युः अपि भवितुं शक्नोति।

## सुभाषितम्

**अक्रोधः सर्वभूतेषु,**
**कर्मणा मनसा गिरा।**
**अनुग्रहश्च दानं च,**
**सतां धर्मः सनातनः॥**

अर्थात्- मन, वाणी और कर्म से किसी भी प्राणी के प्रति क्रोध नहीं करना, सभी पर दया करना और दान देना ही श्रेष्ठ पुरुषों का सनातन धर्म है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारत-यूके आर्थिकव्यापार-अभिसन्धेः अन्तर्गतं पञ्जाबतः प्रेषितः रेडीमेड् परिधानस्य निर्यातः

भारत-यूके-आर्थिक-व्यापार-अभिसन्धेः अन्तर्गतं पञ्जाब-नगरस्य अमृतसर-लुधियाना-नगरयोः रेडीमेड्-वस्त्रस्य, ऊनी-वॉर्स्टेड्-सूत्रस्य च निर्यातः यूके-देशं प्रति प्रेषितः। अस्मिन् अभिसन्धौ भारतस्य यूके-देशं प्रति निर्यातस्य प्रायः ९९ प्रतिशतं शुल्कमुक्तविपण्यप्रवेशः सुनिश्चितः भवति । इदं १३७ सेवा-उपक्षेत्रेषु अवसरानां विस्तारं करोति तथा च वस्त्रं, चर्म, अभियांत्रिकी, खाद्यप्रसंस्करणं, औषधं, एमएसएमई च इत्यादीनां प्रमुखक्षेत्राणां प्रचारं करोति ।

# कौशलपारिस्थितिकी-तन्त्रस्य निर्माणाय विश्वासः, गुणवत्ता, आजीवनशिक्षणं च आवश्यकम् - केन्द्रीयमन्त्री जयन्तः चौधरी



हिमसंस्कृतवार्ता। केन्द्रीय-कौशलविकास-उद्यमितामन्त्री जयन्तः चौधरी अवदत् यत् देशं वैश्विककौशलस्य केन्द्रं विधातुं विश्वासः, गुणवत्ता, आजीवनशिक्षणं च आधारीकृत्य एकं कौशलपारिस्थितिकी-तन्त्रं () निर्मातव्यम्। नवदिल्ल्याम् 'विश्वयुवकौशलदिवसस्य' तथा 'स्किल इण्डिया मिशन' इत्यस्य ११ तमी वर्षपूर्तेः समारोहं सम्बोधयन् श्रीचौधरी अवदत् यत् अस्य वर्षस्य विषयः — "सामूहिकभविष्यस्य कृते कौशलम्" — न केवलं राष्ट्रियावसरेभ्यः श्रमबलं सजीकर्तुं देशस्य प्रतिबद्धतां दर्शयति, अपितु वैश्विकश्रमबाजारं प्रति अपि अस्माकं दृष्टिकोणं प्रकटयति।सः अकथयत् यत् राष्ट्रियशिक्षानीत्याः (NEP) अनुरूपं कौशलं केवलं रोजगारप्राप्तेः माध्यमं न मत्वा आजीवनशिक्षणप्रक्रियायाः एकः महत्त्वपूर्णः भागः मन्तव्यः।श्रीचौधरी महोदयः वेल्डिंग् (सन्धानकार्यम्), इलेक्ट्रिशियन् (विद्युत्कार्यम्), ऑटोमोटिव् मैकेनिक्स् (वाहनयन्त्रशास्त्रम्) इत्यादिषु गैर-पारम्परिकव्यवसायेषु महिलानां न्यूनां सहभागितां प्रति चिन्ताम् अपि प्रकटितवान्।

# कुडनकुलम-परमाणु-ऊर्जा-संयन्त्रस्य संवेदनशील-तथ्यानां प्रकटनम् - 'वर्ल्ड लीक्स' इति हैकर-समूहेन कृता पुष्टिः



हिमसंस्कृतवार्ता। तमिलनाडुराज्ये स्थितस्य देशस्य बृहत्तमस्य कुडनकुलम-परमाणु-ऊर्जा-संयन्त्रस्य संवेदनशीलानि तथ्यानि (डाटा) प्रकटितानि (लीक) जातानि सन्ति। 'वर्ल्ड लीक्स' इति नामकेन द्वयोः हैकर-समूहयोः एकाकिना अस्य परमाणु-संयन्त्रस्य सूचनाः अन्तर्जालपुटे प्रसारिताः, यत्र संयन्त्रस्य केषाञ्चन भागानां रूपरेखाः (ब्लूप्रिण्ट/नक्शा), आपूर्तिकर्तॄणां (सप्लायर्स) विवरणानि, उपवेशनानां निरीक्षणप्रपत्राणां च अभिलेखाः, उपकरणानां समीक्षाः तथा च बीमा-नीतिभिः (इंश्योरेंस) सम्बद्धानां प्रायः एकोनविंशतिसहस्र (19,000) आवश्यकानामभिलेखानां विवरणानि सम्मिलितानि सन्ति। 'वर्ल्ड लीक्स' हैकर-समूहेन पुष्टिः कृता यत् एते अभिलेखाः अनिल-अम्बानी-महोदयस्य 'रिलायंस' समूहस्य सन्ति, यः अस्मिन् संयन्त्रे कंत्राटदार (ठेकेदार) रूपेण कार्यं करोति। उल्लेखनीयं वर्तते यत् तमिलनाडुराज्ये स्थितं कुडनकुलम-परमाणु-ऊर्जा-संयन्त्रं भारतस्य सप्तसु परमाणुसंयन्त्रेषु बृहत्तमं वर्तते। अनिल-अम्बानी-महोदयस्य रिलायंस-समूहेन उक्तं यत् तस्य तथ्यानां (डाटा) आंशिकरूपेण चौर्यं जातम् अस्ति। एतानि तथ्यानि तृतीयपक्षीय-तथ्यकेन्द्र-सेवाप्रदातुः 'योट्टा' इत्यस्य सर्वर्-तन्त्रे आधापितानि (होस्ट) आसन्। रिलायंस-संस्थया अस्याः घटनायाः सूचना भारतसर्वकाराय प्रदत्ता। तथापि, संस्थया एतद् न स्पष्टीकृतं यत् कस्य प्रकारस्य तथ्यानां चौर्यं जातम्। परमाणुसुरक्षा-सम्बन्धिषु विषयेषु सर्वकारेभ्यः परामर्शप्रदात्र्याः तथा च देशानां सज्जतायाः आकलनं कुर्वत्याः संस्थायाः 'न्यूक्लियर थ्रेट इनिशिएटिव' इत्यस्याः वरिष्ठनिदेशकः निकोलस रोथः अवदत् यत् तथ्यप्रकटनेन (डाटा लीक) संयन्त्रस्य सुरक्षायाः कृते गम्भीरं सङ्कटं भवितुं शक्नोति। एतादृश्या घटनया संस्थानां (कम्पनीनां) क्षमतायाः उपरि प्रश्नाः उत्थापिताः यत् ताः एतेभ्यः सङ्कटेभ्यः रक्षितुं कियतीः सक्षमाः सन्ति। सः अकथयत् यत् एतावत् विशालस्य संयन्त्रस्य तथ्यानां प्रकटनं (लीक होना) एकः महती सङ्कटसूचिका घण्टा अस्ति।

# मणिपुरस्य सेनापतौ असम-राईफल्स्-शिविरे अंसयत-जनसमूहेन आक्रमणं कृतम्, वाहनानां क्षतिः



सेनापति। मणिपुरस्य सेनापति-नगरे मङ्गलवासरस्य रात्रौ अनियन्त्रितेन जनसमूहेन 'असम राईफल्स्' इत्यस्य शिविरे (कैम्प) आक्रमणं कृतं तथा च वाहनानां महती क्षतिः कारिता। रक्षासन्त्रालयस्य जनसम्पर्काधिकारिणा (पीआरओ) प्रक्त्रा च बुधवासरे सूचितं यत् मङ्गलवासरस्य रात्रौ राज्यस्य सेनापति-नगरे असम-राईफल्स्-शिविरे उग्रजनसमूहेन प्रस्तरक्षेपणम् (पथराव), अग्निदाहः, प्रचण्डतोडफोडं च कृतम्। ओकलॉङ्ग-क्षेत्रे पूर्वनिर्धारितात् 'नेशनल सोशलिस्ट काउंसिल ऑफ नागालैंड' (एनएससीएन-आईएम) इत्यस्य शिबिरात् प्रायः क्रोशद्वयमितं (२ कि.मी.) पश्चिमे मकुइलॉङ्गडी-क्षेत्रे सशस्त्राणां जनानां उपस्थित्याः विश्वसनीय-गुप्तचर-सूचनाः (इंटेलिजेंस) प्राप्य असम-राईफल्स्-सैनिकैः क्षेत्रे गश्त-अन्वेषण-अभियानं प्रारब्धम् आसीत्। जनसम्पर्काधिकारिणः (पीआरओ) अनुसारं, गुप्तचरविवरणैः सामाजिक-माध्यम-सन्देशैः (सोशल मीडिया पोस्ट) च एतादृशाः सङ्केताः प्राप्ताः यत् केचन सशस्त्राः उग्रवादिनः निर्धारितशिविरेभ्यः बहिः आयुधैः सह सैन्यवेषं (वर्दी) धृत्वा भ्रमन्ति स्म, यत् संघर्षविराम-नियमानां स्पष्टम् उल्लङ्घनं प्रतीयते। तेन कथितं यत् एतेषाम् उल्लङ्घनानां तज्जनित-सुरक्षाचिन्तानां च विषये 'संघर्षविराम निगरानी समूह' (सीएफएमजी) इत्यस्मै अपि औपचारिकरूपेण सूचितं कृतम्। अभियानकाले मकुइलॉङ्गडी-ओकलॉङ्ग-ग्रामान् प्रति गच्छन्तीनां असम-राईफल्स्-सैन्यटुकडीनां मार्गः स्थानीयवासिभिः (यत्र महिलाः अपि आसन्) अवरुद्धः। सैन्यटुकडिभिः परमः संयमः प्रदर्शितः तथा च स्थानीयप्रतिनिधिभिः सह वार्तालापः कृतः। तैः प्रतिनिधिभ्यः विश्वासः दिलायितः यत् अस्य अभियानस्य उद्देश्यं केवलं क्षेत्रे सुरक्षां सुनिश्चितं करणं शान्तिस्थापनं च अस्ति। तैः आश्वस्तं कृतं यत् सैनिकाः अधिकारिणाम् अनुमतिं विना कस्यापि ग्रामस्य अन्तः न प्रवेक्ष्यन्ति।



# पञ्जाब-काङ्ग्रेसे आन्तरिककलहः तीव्रः - दिल्ल्यां वरिष्ठनेतारः आहूताः, नेतृत्वपरिवर्तनस्य सम्भावना

पञ्जाब-काङ्ग्रेस-दले वर्धमानः गुटवादः वर्षे २०२७ तमे भवितव्यात् विधानसभा-निर्वाचनात् पूर्वं दलस्य कष्टानि वर्धितवान् अस्ति। अपरपक्षे इदानीम् अनुमानानि क्रियन्ते यत् पञ्जाब-काङ्ग्रेसे प्रचलतः आन्तरिककलहस्य शीघ्रमेव अन्तः भवितुं शक्नोति। वार्ता अस्ति यत् दलस्य उच्चाधिकारिभिः (आलाकमान) पञ्जाबस्य बहवः वरिष्ठनेतारः दिल्ल्यां समाहूताः सन्ति। एतादृश्यः सम्भावनाः प्रकटीक्रियन्ते यत् दलम् अमरिन्दर-राजा-वडिङ्ग महोदयात् प्रान्तीय-इकाई-नेतृत्वस्य दायित्वं प्रत्याहर्तुं शक्नोति। तत्रैव पूर्वमुख्यमन्त्रिणः चरणजीतसिंहचन्नी-समूहस्यापि आघातः भवितुं शक्नोति। प्रदेशे नेतृत्वं प्रति वर्धमानं विवादं नेत्रां मध्ये असन्तोषं च वीक्ष्य काङ्ग्रेस-नेतृत्वेन अस्य प्रकरणस्य स्वस्तरे समाधानप्रक्रिया तीव्रीकृता अस्ति।अस्मात् पूर्वं बुधवासरे उच्चाधिकारिभिः सहसा दलस्य विधायकमण्डलनेता प्रतापसिंहबाजवा दिल्ल्यां समाहूतः। तत्र सङ्घटनमहामन्त्रिणा के.सी. वेणुगोपालेन सह तस्य उपवेशनं (मीटिंग) जातम्। तस्मिन् समये इयम् अपि चर्चा आसीत् यत् अमरिन्दर-राजा-वडिङ्ग महोदयात् त्यागपत्रं स्वीकृत्य बाजवा महोदयः अध्यक्षः (प्रधानः) विधातुं शक्यते, परन्तु बाजवा ततः परं पञ्जाबं प्रत्यागतवान्। पञ्जाबम् आगत्य सः पूर्वमुख्यमन्त्रिणा चरणजीतसिंहचन्नी महोडेन सह अमिलत्। प्रसारमाध्यमानां विवरणानुसारं पञ्जाब-काङ्ग्रेसे मचे कोलाहले उच्चाधिकारिणाम् (हाईकमान) मध्ये अपि मतभेदाः उत्पन्नाः सन्ति। विवरणेन ज्ञायते यत् अस्मिन् प्रकरणे राहुलगाँधिनः दलस्य (टीम) तथा राष्ट्रियाध्यक्षस्य मल्लिकार्जुनखडगे महोदयस्य च भिन्नाः विचाराः सन्ति। कथितं वर्तते यत् काङ्ग्रेसमहामन्त्रिणः के.सी. वेणुगोपालः तथा पञ्जाबप्रभारी भूपेशबघेलः न इच्छन्ति स्म यत् राजा वडिङ्ग महोदयः अध्यक्षपदात् निष्कास्येत। अपरपक्षे खडगे महोदयः परिवर्तनेन सम्बद्धां चर्चां कर्तुं पक्षधरः अस्ति। एतदेव कारणं वर्तते यत् के.सी. वेणुगोपालेन सह एकहोरात्मक-उपवेशनान्तरं खडगे महोदयेनापि बघेलः समाहूतः तथा पञ्जाबस्य स्थितेः विषये प्रश्नोत्तराणि कृतानि।

# मुख्यमन्त्री सुक्खूः अवदत्- निर्धनानां भूमिहीनानां च जनानाम् अतिक्रमण-प्रकरणेषु शिथिलतार्थं निर्मास्यामः नीतिम्



हिमसंस्कृतवार्ताः- हमीरपुरम्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना हमीरपुरक्षेत्रे प्रायः १९.४० कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य नगरनिगम-कार्यालयभवनस्य शिलान्यासः, लघुव्यापारिणां महिला-स्वयं- सहायता- समूहानां च कृते प्रायः ५० लक्षरूप्यकाणाम् उत्पादनमूल्येन निर्मितानाम् आपणानां ग्रामीणहाटस्य च उद्घाटनं विहितम्। तदुपरान्तं टाउन-हॉल मध्ये एकां जनसभां सम्बोधयन् मुख्यमन्त्री उद्घोषयत् यत् सर्वकारीयभूमौ बहुवर्षेभ्यः पूर्वं उषितानां निर्धनानां भूमिहीनानां च जनानां गृहेभ्यः शिथिलतां प्रदातुं प्रदेशसर्वकारः एकां नीतिं निर्मातुं विचारं करिष्यति, येन तेभ्यः साहाय्यं प्राप्तुं शक्येत। तेन प्रोक्तं यत् राज्यसर्वकारः अतिक्रमणप्रकरणानां सन्दर्भे उच्चतमन्यायालयस्य (सुप्रीम कोर्ट) दिशानिर्देशानाम् अध्ययनं करोति अस्मिन् च उचितः निर्णयः ग्रहीष्यते।

## स्वास्थ्य-शिक्षाक्षेत्रे सर्वकारस्य प्राधान्यम्

तेन कथितं यत् स्वास्थ्य-शिक्षाक्षेत्राणि प्रदेशसर्वकारस्य प्राधान्यसूच्यां वर्तन्ते। सर्वकारः राज्यस्य सर्वेषु आयुर्विज्ञानमहाविद्यालयेषु आधुनिक- अत्याधुनिक-यन्त्राणां संस्थापनाय, सुपर- स्पेशलिस्ट-चिकित्सकानां प्राध्यापकानां च नियुक्तये विशेषं ध्यानं केन्द्रितं करोति, येन जनेभ्यः प्रदेशस्य आन्तरमेव 'एम्स' (AIIMS), 'पीजीआई' (PGI) स्तरस्य चिकित्सासुविधाः उपलभ्येरन्। एतासु चिकित्सासंस्थासु प्रयोगशालानाम् आधुनिकीकरणाय प्रदेशसर्वकारः १२५ कोटिरूप्यकाणि व्ययीकरोति। राज्यसर्वकारः सामान्यातुरेभ्यः अत्यन्तं महार्घां रोबोटिक- शल्यक्रियां (रोबोटिक सर्जरी) न्यूनव्ययेन उपलब्धं कारयति। एतेषु महाविद्यालयेषु पी.जी. (PG) आसनानां सङ्ख्यायाम् अपि महत्या सङ्ख्यया वृद्धिः क्रियते। अनेन प्रदेशे अधिकाः विशेषज्ञ- चिकित्सकाः उपलप्स्यन्ते स्वास्थ्यसेवाश्च सशक्ततां प्राप्स्यन्ति।

## जोल-सप्पड़ परिसरे शीघ्रमेव आरप्स्यते चिकित्साहाविद्यालयः

मुख्यमन्त्रिणा प्रतिपादितं यत् तेन यू.पी.ए. (UPA) शासनकाले तत्कालीन-प्रधानमन्त्रिणः डॉ. मनमोहनसिंहस्य केन्द्रीय- स्वास्थ्यमन्त्रिणः गुलाममबी-आजादस्य च साहाय्येन हमीरपुरक्षेत्राय मेडिकल-कॉलेजः स्वीकृतः कारितः आसीत्। वर्तमान-प्रदेशसर्वकारः अस्य महाविद्यालयस्य कृते सम्प्रति प्रायः ५०० कोटिरूप्यकाणि प्रसारितवान् अस्ति। तेन प्रोक्तं यत् 'जोल सप्पड़' इत्यस्य नूतने परिसरे अस्य महाविद्यालयस्य सञ्चालनं शीघ्रमेव आरप्स्यते। तेन दृढीकृतं यत् प्रदेशसर्वकारः 'हिमकेयर' योजनां न स्थगयिष्यति, परन्तु अस्याः योजनायाः नाम्नि संजातं कथितघोटालां प्रकटं करिष्यति।

तेन उक्तं यत् प्रदेशसर्वकारेण शिक्षाक्षेत्रे अनेके परिष्काराः कृताः, सी. बी. एस. ई. विद्यालयानां स्थापनायाः कारणतः प्रदेशस्य सर्वकारीय- विद्यालयेषु छात्रसङ्ख्यायां प्रायः २४ सहस्राणां वृद्धिः अभवत्। प्रदेशसर्वकारेण एच. पी. पी. एस. सी., हिमाचलप्रदेश-राज्यचयन- आयोगस्य माध्यमेन सर्वासु नियुक्तिषु पारदर्शितां सुनिश्चितां कृत्वा प्रतिभावद्भिः युवकैः सह न्यायः विहितः। तेन कथितं यत् किशाऊ-बन्धपरियोजना, अन्याः जलविद्युत्परियोजनाः, 'वाइल्ड फ्लॉवर हॉल' सदृशेषु प्रकरणेषु प्रदेशसर्वकारेण दृढतया स्वपक्षः स्थापितः, येन हिमाचलस्य हितानां रक्षा अभवत् प्रदेशाय च अर्बुदशः (अरबों) रूप्यकाणां राजस्वं सुनिश्चितं जातम्।

## नगरनिगमे समाविष्टानाम नूतनक्षेत्राणां जनेभ्यः ५ वर्षाणि यावत् करमुक्तिः

मुख्यमन्त्रिणा प्रोक्तं यत् नगरनिगम-हमीरपुरे समाविष्टानां नूतनक्षेत्राणां जनेभ्यः पञ्चवर्षाणि यावत् करेषु शमनं प्रदास्यते। हमीरपुरे प्रायः १३० कोटिरूप्यकाणां व्ययेन प्रदेशस्य सर्वतः बृहत्तमस्य बस-स्थानकस्य निर्माणं क्रियते। वर्तमान- बसस्थानकस्य स्थाने प्रायः २०० कोटिरूप्यकाणां सञ्चयमूल्येन आधुनिक- सिटी- सेन्टर इत्यस्य निर्माणं विधास्यते। अत्र नगरवासिभ्यः प्रतिदिनं बहिस्तः आगच्छद्भ्यः जनेभ्यश्च आपणिकीं, मनोरञ्जनं, वाहनस्थानं (पार्किंग) च सम्मिलितं कृत्य सर्वाः सुविधाः उपलप्स्यन्ते। पुरातनाः व्यापारिणः अपि अस्मिन् सिटी-सेन्टर मध्ये अथवा अन्येषु उपयुक्तेषु स्थानेषु समायोजिताः करिष्यन्ते।

तेन कथितं यत् हमीरपुरे विभिन्नानां विभागानां, निगमानां, बोर्डानां च पञ्च राज्यस्तरीयाः कार्यालयाः स्थापिताः सन्ति अनेकाः बृहत्यः परियोजनाश्च स्वीकृतिः प्राप्ताः। मुख्यमन्त्रिणा हमीरपुरे विजयदशमी-उत्सवाय (दशहरा) अन्येभ्यः आयोजनेभ्यश्च उपयुक्तायाः भूमेः विकासं कर्तुं अन्यासाम् याचनानां पूरणाय च उद्घोषणा कृता। तेन हमीरपुरनगरस्य रेहड़ी-फहड़ी धारकेभ्यः (लघु-विक्रेतृभ्यः) अपि श्रेष्ठाः सुविधाः प्रदातुम् आश्वासनं दत्तम्।

# प्रत्येकस्मिन् क्षेत्रे विफला काङ्ग्रेस-सर्वकारः न पुनः आगमिष्यति अपि तु पराजिता भविष्यति- विक्रमठाकुरः



हिमसंस्कृतवार्ताः- शिमला। भाजपादलस्य विधायकः पूर्वं उद्योगमन्त्री च विक्रमसिंहठाकुरः अवदत् यत् प्रत्येकस्मिन् क्षेत्रे असफला काङ्ग्रेस-सर्वकारः राज्ये पुनः सत्तायां न आगमिष्यति (पुनरावृत्तिः न भविष्यति) अपि तु पराजिता भविष्यति। हिमाचलप्रदेशे काङ्ग्रेसदलस्य बीजमपि विनशिष्यति। जनता एतस्मै पाठं पाठयितुं सज्जा वर्तते। बुधवासरे प्रसारिते वक्तव्ये विक्रमसिंहः अवदत् यत् सर्वकारः विकासस्य लोकहितस्य च विषयेषु कार्यं कर्तुं स्थाने राजनैतिकप्रबन्धने सत्तासन्तुलने च व्यग्रः अस्ति। अस्य दुष्परिणामं राज्यस्य जनता भुङ्क्ते।पूर्व-उद्योगमन्त्री नालागढ-चिकित्सा- उपकरण- उद्यान (मेडिकल डिवाइस पार्क) परियोजनायाः उल्लेखं कुर्वन् अवदत् यत् भाजपा-सर्वकारस्य समये स्वीकृता एषा परियोजना राज्ये औद्योगिक- विकासस्य रोजगारसृजनस्य च दृष्ट्या अत्यन्तं महत्त्वपूर्णा आसीत्।

सः आरोपं कृतवान् यत्- केन्द्रसर्वकारेण प्रदत्ता १०० कोटिरूप्यकाणां अनुदानराशिः प्रत्यर्पिता। अनेन निर्णयप्रमादेन सहस्रशः यूनां सम्भावित- रोजगार- अवसराः बाधिताः अभवन्।

सर्वकारः अधुना बृहन्निवेशस्य व्यापारस्य (टर्नओवर) च दावान् करोति, परन्तु धरातले प्रगतिः अपेक्षानुकूला नास्ति।

## खनन-माफिया तथा बैकडोर-भर्तीविषये प्रहारः-

विक्रमसिंहठाकुरेण उक्तं यत् खनन-माफिया विरुद्धं कठोरा कार्यवाही न करणात् बहवः प्रश्नाः उद्भवन्ति। बाह्यस्रोत-नियुक्तिं (आउटसोर्स भर्ती) अधिकृत्य उद्योगमन्त्रिणः प्रसारितस्य (वायरल) वक्तव्यस्य सन्दर्भं दत्त्वा सः अवदत् यत् यदि अनुशंसाधारेण (सिफारिश-आधारेण) शताधिकानां जनानां कृते रोजगारप्रदानस्य वार्ता सत्या अस्ति, तर्हि एषः पश्चाद्वार-नियुक्तेः गुरुतरः विषयः अस्ति। अस्य प्रकरणस्य उच्चस्तरीयं अन्वेषणं भवेत्।

# नगरनिगममहापौरस्य शपथग्रहणे विलम्बं प्रति उच्चन्यायालयः कठोरः, मण्डी-उपायुक्ताय निर्देशः




हिमसंस्कृतवार्ताः- मण्डी। नगरनिगममण्ड्याः नवनिर्वाचितायै महापौराय (मेयर) सुमनायै अद्यापि पदस्य गोपनीयतायाश्च शपथं न कारितं इति विषये हिमाचलप्रदेश-उच्चन्यायालयः मण्डी-उपायुक्तं आगामिश्रवणं यावत् नियमानुकूलम् आवश्यकं क्रियां कर्तुं निर्देशितवान्। न्यायालयेन राज्यनिर्वाचनआयुक्तेन सह सम्बन्धितेभ्यः प्रतिवादिभ्यः अपि उत्तरं याचितम्। अस्य प्रकरणस्य आगामिश्रवणं २१ जुलाई दिनाङ्के भविष्यति।न्यायमूर्तेः ज्योत्स्ना रिवाल दुआ महोदयायाः एकलपीठेन 'सुमन विरुद्धं राज्यनिर्वाचनआयुक्तः अन्ये च' इति प्रकरणस्य श्रवणकाले एषः आदेशः पारितः। याचिकाकर्त्र्या सुमनया न्यायालयः सूचितः यत् सा गत २९ जून दिनाङ्के मण्डी नगरनिगमस्य महापौररूपेण विधिवत् निर्वाचिता अभवत्, परन्तु अद्यापि मण्डी-उपायुक्ता तां पदस्य गोपनीयतायाश्च शपथं न कारितवान्। अस्मात् कारणात् सा महापौरपदस्य कार्यभारं ग्रहीतुं न शक्नोति, स्वपदेन सह सम्बद्धानां वैधानिक- दायित्वानां निर्वहणात् वञ्चिता अस्ति। श्रवणकाले राज्यनिर्वाचन- आयुक्तस्य राज्यसर्वकारस्य च पक्षतः अधिवक्तृभिः न्यायालये उपस्थाय सूचनापत्रं (नोटिस) स्वीकृतम्। प्रारम्भिकश्रवणानन्तरं उच्चन्यायालयः मण्डी उपायुक्तं निर्देशितवान् यत् सः आगामिश्रवणात् पूर्वं नियमानुसारम् आवश्यकीं क्रियां कुर्यात्। अनेन सह सर्वैः सम्बन्धित- प्रतिवादिभिः अपि स्वकीयम् उत्तरं आवश्यकाः निर्देशाः च न्यायालये प्रस्थापयितुं कथिताः। उच्चन्यायालयः अस्य प्रकरणस्य आगामिश्रवणाय २१ जुलाई दिनाङ्कं निश्चितवान्।

# 'यदि कुत्रापि भ्रष्टाचारः अस्ति, तर्हि भाजपा लिखितरूपेण ददातु'- उद्योगमन्त्री

## सर्वकारस्य विरुद्धं भाजपेति दलस्य आरोपपत्र-आनयनस्य विषये उद्योगमन्त्रिणः तीव्रा प्रतिक्रिया



हिमसंस्कृतवार्ताः- शिमला ।राज्यसर्वकारस्य विरुद्धम् आरोपपत्रं (चार्जशीट) आनयनस्य विषये उद्योगमन्त्रिणः हर्षवर्धन चौहानस्य मङ्गलवासरे भाजपायाः उपरि दृढः प्रहारः कृतः। तेन प्रोक्तं यत् यदि राज्यस्य सर्वकारे विभागे वा कस्यापि प्रकारस्य भ्रष्टाचारः संजातः, तर्हि भाजपा लिखितरूपेण मुख्यमन्त्रिणं सम्बद्धमन्त्रिणं च दातुं शक्नोति, तस्य उपरि दृढा कार्यविधिः विधास्यते। तेन कथितं यत् पूर्णपारदर्शितया सह सर्वकारेण सार्धत्रिवर्षाणां कार्यकालः पूरितः। अस्मिन् अन्तरे सर्वकारस्य उपरि भ्रष्टाचारस्य एकोऽपि आरोपः न जातः। सर्वकारेण नियमानुसारेण कार्यं विहितम्। उद्योगमन्त्रिणा प्रतिपादितं यत् सर्वकारः आरोपपत्रात् (चार्जशीट) न भीतः भविष्यति, भाजपा यत्किमपि कर्तुम् इच्छति, तत् कर्तुं शक्नोति। तेन उक्तं यत् प्रदेशे विधानसभा सर्वतः बृहत्तमं मञ्चं (प्लेटफॉर्म) भवति अस्य आन्तरे च कस्यापि विषयस्य उपरि चर्चां कर्तुं आनेतुं शक्यते। तेन आरोपः कृतः यत् भाजपा भ्रष्टाचारस्य अनियमिततानां च घटनाः सदने उपस्थापयितुं नाक्नोत्।

### केन्द्रसर्वकारेण आर.डी.जी. (RDG) अनुदानं स्थगनं कृत्वा कृतः कुठाराघातः-

अस्मिन् अन्तरे तेन भाजपानेतृणाम् उपरि केन्द्रे गत्वा प्रदेशस्य प्रकल्प्यानां अनुदानानां च रोधनस्य अपि आरोपाः स्थापिताः। उद्योगमन्त्रिणा कथितं यत् प्रदेशाय सार्धत्रिवर्षेषु किमपि विशेषानुदानं न प्राप्तम्। केवलं तदेव धनं लब्धं, यत् राज्यस्य वैधानिकः अधिकारः अस्ति। तेन प्रोक्तं यत् केन्द्रस्य भाजपासर्वकारेण ७५ वर्षेभ्यः राज्यं प्राप्यमाणं आरडीजी (RDG) अनुदानं स्थगनं कृत्वा जनसामान्यानां उपरि कुठाराघातः विहितः अस्य प्रभावः मन्त्रि-विधायकानां उपरि न अपितु समाजस्य प्रत्येकस्मिन् वर्गे अभवत्। तेन उक्तं यत् प्रधानमन्त्रिणा गते वर्षे राज्यस्य कृते १५०० कोटिरूप्यकाणां सहायताराशेः उद्घोषणा कृता आसीत् प्रदेशस्य जनाः अद्यापि तस्य धनस्य प्रतीक्षां कुर्वन्तः सन्ति।

### नाट्यकरणे असत्यभाषणे च भाजपायाः तुलना नास्ति

हर्षवर्धनचौहानमहोदयेन प्रतिपादितं यत् नाट्यकरणे असत्यभाषणे च भाजपायाः केनापि सह तुलना नास्ति। उद्योगमन्त्रिणा तीक्ष्णा प्रतिक्रिया प्रकटयता कथितं यत्- "यदि असत्यभाषणस्य अन्तर्राष्ट्रियस्तरीया कापि प्रतियोगिता भवेत्, तर्हि तस्यां भाजपा देशस्य कृते स्वर्णपदकम् (गोल्ड मेडल) अवश्यमेव आनेष्यति।"

# आकस्मिक-जलप्लावेन (फ्लैश फ्लड) मलिनावशेषेण च उत्पन्ने सङ्कटे हिमाचल-

## उच्चन्यायालयः दृढः, किन्नौर-मण्डलस्य उपायुक्तः वैयक्तिकरूपेण न्यायालयं प्रति आक्षिप्तः

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेश-उच्चन्यायालयः किन्नौरमण्डले आकस्मिक-जलप्लावेन मलिनावशेषेण च सेतोः जलनिमज्जनस्य आवासीयानां भवनानां च कृते उत्पन्नं सङ्कटं ध्यात्वा कठोरं दृष्टिकोणं स्वीकृतवान्। न्यायालयेन पूर्वतनादेशानां पश्चादपि पर्याप्तानां यन्त्राणां, संस्थापने शिथिलतायाः प्रदर्शनं प्रति असन्तोषं प्रकटयता किन्नौरमण्डलस्य उपायुक्तः वैयक्तिकरूपेण न्यायालयम् आहूतः।मुख्यन्यायाधीशस्य जी. एस. सङ्धावालिया महोदयस्य न्यायाधीशस्य बिपिन सी. नेगी महोदयस्य च खण्डपीठेन जनहितयाचिकायाः श्रवणोत्तरम् एते आदेशाः प्रसारिताः। एतत् प्रकरणं 'तैती खड्ड' इत्यस्य मूलप्रवाहस्य पुनरुज्जीवनाय तत्र सञ्चितस्य मलबा-बोल्डर इत्यादीनां निष्कासनाय च सम्बद्धम् अस्ति।

### न्यायालये उपस्थापितानि चित्राणि-

श्रवणकाले न्यायालयमित्रेण न्यायालयस्य समक्षं ९ तथा १० जुलाई २०२६ दिनाङ्के आगतस्य आकस्मिक-जलप्लावस्य (फ्लैश फ्लड) चित्राणि प्रस्तुतानि। एतेभ्यः स्पष्टं प्रतीयते यत् उपनदे एकत्रेण मलिनावशेषेण तत्रत्यः सेतुः (पुल) पूर्णतया जलमग्नः जातः परितः स्थितेषु भवनेषु अपि गम्भीरं सङ्कटं जातम्।

### पूर्वमेव न्यायालयेन आदेशाः दत्ताः आसन्

न्यायालयः अलभत यत् अक्टूबर २०२५ मध्ये एव मण्डलाप्रशासनाय अधिकानां यन्त्राणां नियोजनाय आदेशाः दत्ताः आसन्।





परन्तु सद्यः प्राप्तायाः आख्यायाः (रिपोर्ट) प्रकाशं जातं यत् सितम्बर २०२५ मध्ये केवलं एका 'पोकलेन' यन्त्रं मात्रं ४० घण्टां यावत् कार्ये प्रयुक्तम् आसीत्। न्यायालयेन एतत् स्वकीयस्यादेशस्य साक्षात् अवहेलना इति मत्वा परिगणितम्।

### विभागेन प्रदत्तं शपथपत्रम्-

लोकनिर्माणविभागस्य रामपुर-वृत्तस्य (सर्कल) अधीक्षण- अभियन्त्रा प्रदत्तेन शपथपत्रेण ज्ञायते यत्, उपनदस्य तलं प्रायः ३ मीटर गभीरं कर्तुं जलशोधनाय (ड्रेजिंग) च ₹१.२५ कोटिरूप्यकाणाम् अनुमानितं व्ययपत्रं (बजट) सज्जीकृत्य स्वीकृतेः कृते प्रेषितम् अस्ति।

### उपायुक्तेन दातव्यं भविष्यति स्पष्टीकरणम्

उच्चन्यायालयः किन्नौरस्य उपायुक्तं प्रति दृढां सचेतनां दत्तवान् यत् सः २८ जुलाई २०२६ दिनाङ्के भवितव्यायाम् आगामिश्रवणे व्यक्तिगतलक्षणेन न्यायालये उपस्थितः तिष्ठेत्। तेन एतद् स्पष्टीकरणं दातव्यं भविष्यति यत् प्रकरणे न्यायालये लम्बिते सत्यपि नाला-स्वच्छीकरणाय पर्याप्तानि यन्त्राणि किमर्थं न नियोजितानि।

# हिमाचले वेगं प्राप्स्यति प्रावृट्कालः, चत्वारि दिनानि यावत् धारासाराः वृष्टिः भविष्यति, बहुभागेभ्यः नारङ्ग-सतर्कता

हिमसंस्कृतवार्ताः- कार्यालयीय प्रतिनिधिः। हिमाचलप्रदेशे प्रावृट्कालः पुनः वेगं प्राप्स्यति। राज्यस्य अधिकांशभागेषु निरन्तरं चत्वारि दिनानि यावत् धारासारवृष्टेः पूर्वानुमानं वर्तते। बहुषु भागेषु दिनद्वयं यावत् अतितः अतिवृष्टेः 'नारङ्गसतर्कता' प्रसारिता अस्ति। विगतेभ्यः द्वि-त्रिदिनेभ्यः प्रदेशे मानसूनः मन्दः आसीत्। अस्मात् कारणात् उष्मा प्रवृद्धा। शिमलाक्षेत्रे अपि घर्मकारणात् प्रस्वेदः निर्गच्छति। बुधवासरे राजधान्या सह परितः भागेषु सूर्यप्रकाशेन साकं मन्दाः मेघाः आच्छादिताः आसन्।

### २१ जुलाई पर्यन्तम् एतादृशं स्थास्यति ऋतुः-

ऋतुविज्ञानकेन्द्र-शिमलायाः अनुसारं १५ एवं १६ जुलाई दिनाङ्के राज्ये केषुचित् स्थानेषु मन्दा वृष्टिः, १७ जुलाई दिनाङ्के केषुचित् क्षेत्रेषु मन्दतः मध्यमा वृष्टिः सम्भाविता अस्ति। तदनन्तरं १८ तः २१ जुलाई पर्यन्तं राज्यस्य अधिकांशभागेषु मन्दतः मध्यमा वर्षा भवितुं शक्नोति। १८ तथा १९ जुलाई दिनाङ्के केषुचित् स्थानेषु घोरवृष्टेः, २० एवं २१ जुलाई दिनाङ्के केषुचित् क्षेत्रेषु अतिघोरवृष्टेः नारङ्ग- सतर्कता प्रसारिता अस्ति।

### तापमाने भविष्यति परिवर्तनम्-

आगामि-४-५ दिनानां अन्तरे राज्यस्य बहुषु भागेषु न्यूनतमे तापमाने किमपि बृहत् परिवर्तनं भवितुं सम्भावना नास्ति। तत्रैव राज्यस्य अनेकेषु भागेषु अधिकतमं तापमानं २ तः ४ डिग्री सेल्सियस पर्यन्तं पतितुं शक्नोति। राज्ये बहुषु स्थानेषु अधिकतमं तापमानं सामान्यात् २ तः ३ डिग्री सेल्सियस अधिकम् आसीत्, यदा च केषुचित् स्थानेषु एतत् सामान्यं वा सामान्यस्य अन्तिकं वा आसीत्। उच्चपर्वतीयक्षेत्रेषु एतत् २१ तः २८ डिग्री सेल्सियस, मध्यमपर्वतीयक्षेत्रेषु २५ तः ३४ डिग्री सेल्सियस, निम्नपर्वतीयक्षेत्रेषु अथवा समतलक्षेत्रेषु च ३०तः ३६ डिग्री सेल्सियस इत्यस्य मध्ये अभवत्।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य एकं विचित्रं वृत्तं मया ज्ञातम्। अमेरिकादेशेन एकः विशालः अन्तरिक्षदर्पणः स्वीकृतः अस्ति। रात्रि-काले अपि प्रकाश-प्रसारणाय एषः दर्पणः अन्तरिक्षे स्थापितः। अस्यां योजनायाम् अमेरिका-देशस्य एका संस्था कार्यं कृतवती अस्ति।

**काव्या-** नमस्ते नन्दिनि। अन्तरिक्ष-दर्पणस्य वार्ता तु अतीव विस्मयकारिणी। यदि रात्रिः अपि दिवा भवेत्, तर्हि पक्षिणः व्याकुलाः भवेयुः। अस्तु, द्वितीयं वृत्तं कथयामि। फिन-देशस्य विपणिषु अविवाहितानां कृते पाटलवर्णाः कण्डोलाः निर्मिताः सन्ति। ये अविवाहिताः सन्ति, तैः एते कण्डोलाः गृह्यन्ते। अनेन अन्ये जनाः तेषाम् एकाकिताम् अवगच्छन्ति।

**नन्दिनी-** अहो! एषा योजना तु अतीव सरला वर्तते। विपणिषु एव विवाह-सम्बन्धाः निश्चिताः भवितुं शक्नुवन्ति! परन्तु भारते सर्वोच्च- न्यायालयः अतीव क्रुद्धः जातः। तत्र 'समय-रैना' इत्यादयः उपहासकाः लक्ष्यीकृताः दण्डिताः च सन्ति। दिव्याङ्ग-बालकानां साहाय्यार्थं तैः पूर्वं प्रतिज्ञा कृता, परन्तु सा प्रतिज्ञा तैः न पालिता। न्यायालयेन घोषितं यत् तैः न्याय-व्यवस्था उपहसिता।

**काव्या-** सत्यम्। हास्य-कलाकाराः तु जुगुप्सितं कार्यं कृतवन्तः सन्ति। किन्तु न्यायालयेन अयोग्यः एव निर्णयः दत्तः। अभिव्यक्तिस्वेच्छा अत्यावश्यकी। लोकनिन्दा पर्याप्ता अत्र। अधुना चतुर्थं वृत्तं कथयामि। सङ्गणकक्रीडानां जगति एका नवीनक्रीडा आरब्धा अस्ति। अस्याः क्रीडायाः नाम 'प्रिय-यात्रिणः' इति अस्ति। अत्र क्रीडकैः एकं भग्नं विमानं चाल्यते, क्रुद्धाः यात्रिणः विमानात् बहिः क्षिप्यन्ते च।

**नन्दिनी-** एषा क्रीडा तु मनोरञ्जिका अपि प्रतिभाति। अद्यतनी चर्चा अत्रैव समाप्यते। पुनः मेलिष्यामः। धन्यवादः।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# 'विश्वपटले कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः स्वकीयं विशिष्टं परिचयं स्थापयेत्'- डॉ. पंकजचान्देः




## ❑ 'संस्कृतविद्वांसः भारतस्य बौद्धिकी उत्कृष्टा सम्पत्तिः'- डॉ. अतुलवैद्यः

## ❑ कविकुलगुरु- कालिदास- संस्कृतविश्वविद्यालये 'महाकवि- कालिदास- संस्कृतव्रती- राष्ट्रीयपुरस्कार- समारोह राष्ट्रे अन्ताराष्ट्रे च ख्यातिप्राप्तानां संस्कृतविदुषां भव्यं सम्मानम्

हिमसंस्कृतवार्ताः- डॉ रेणुका बोकारे, नागपुरम्।
कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयद्वारा प्रतिवर्षं पं. रामनारायणशर्मा वैद्यमहोदयस्य स्मृतौ पं. रामनारायणशर्मा आयुर्वेद- अनुसन्धानप्रतिष्ठानस्य, स्थानीयमण्डलाप्रशासनस्य, महाराष्ट्र- पर्यटन- विकासमहामण्डलस्य (नागपुरम्) संयुक्ततत्त्वावधाने 'महाकविकालिदास- संस्कृतव्रती- राष्ट्रीयपुरस्कारः' प्रदीयते। संस्कृतक्षेत्रे अमूल्यं योगदानं दत्तवन्तः कुल ९ विद्वांसः विश्वविद्यालयद्वारा आयोजिते भव्यसमारोहे १५ जुलाई २०२६ दिनाङ्के रामटेकक्षेत्रे एतेन प्रतिष्ठितेन पुरस्कारेण सम्मानिताः।
पुरस्कारसमारोहस्य अध्यक्षतां विश्वविद्यालयस्य माननीयाः कुलगुरवः डॉ. अतुलवैद्यमहोदयाः विहितवन्तः। कविकुलगुरु- कालिदास- संस्कृतविश्वविद्यालयस्य संस्थापकाः कुलगुरवः डॉ. पंकजचान्देमहोदयाः मुख्यातिथिरूपेण उपस्थिताः आसन्, यदा च आईसीटी विश्वविद्यालयः मुम्बई इत्यस्य पूर्वकुलगुरवः प्रो. गणपतियादवमहोदयाः विशिष्टातिथिरूपेण समारोहे सम्मीलिताः अभवन्। बैद्यनाथसंस्थायाः निदेशकाः डॉ. सुरेशशर्मामहोदयाः महाराष्ट्र- पर्यटन- विकास- महामण्डलस्य वरिष्ठाः प्रादेशिकप्रबन्धकाः दिनेशपाटीलवर्यः विशेष- अतिथिरूपेण उपस्थिताः आसन्। संस्कृत- संस्कृतेतर- भाषासङ्कायस्य अधिष्ठात्री प्रो. कविताहोले, रामटेकपरिसरस्य निदेशकाः प्रो. हरेकृष्ण अगस्ती, कुलसचिवः डॉ. रोशन अलोने महोदयाः सहितं बहवः गण्याः मान्याः च मञ्चासीनाः आसन्।कार्यक्रमस्य शुभारम्भः मान्यवरैः दीपप्रज्वालनेन सह अभवत्। स्वागतं प्रास्ताविकं च भाषणम् अधिष्ठात्री प्रो. कविताहोले महोदया प्रस्तुतवती। सा अस्य पुरस्कारस्य गौरवशालिनीं परम्पराम् उल्लिखन्ती अवदत् यत् एतादृशानां प्रतिष्ठितानां विदुषां सम्माननं विश्वविद्यालयस्य कृते अत्यन्तं गौरवस्य सौभाग्यस्य च विषयः वर्तते।
अस्मिन् अवसरे पुरस्कारसमारोहस्य सचित्रे इतिहासे आधारितायाः स्मारिकायाः तथा च विश्वविद्यालयस्य 'वैदर्भी' इति वार्तापत्रिकायाः (समाचार पत्रिका) अपि विमोचनं (लोकार्पणं) विहितम्। अस्मिन् समारोहे वर्ष २०२३, २०२४, २०२५ तमाय वर्षाय चयनं प्राप्ताः आहत्य ९ विद्वांसः मान्यवराणां करकमलैः सम्मानिताः कृताः। पुरस्काराः तिसृषु श्रेणीषु अन्तर्राष्ट्रिय- संस्कृतविद्वान्, वरिष्ठसंस्कृतविद्वान्, युवासंस्कृतविद्वान् इति प्रदिष्टाः। सम्मानपत्राणां वाचनं पुरस्कारसमारोहस्य संयोजिका डॉ. रेणुकाबोकारे, प्रो. राधादेशकरः, अथर्वभारद्वाजः, डॉ. सिमरनठाकुरा इत्येतैः कृतम्।
अन्तर्राष्ट्रिय- संस्कृतविद्वच्छ्रेण्यां संस्कृत- शिक्षाशास्त्रयोः अन्तर्राष्ट्रियख्यातिप्राप्तविद्वान् प्रो. चान्दकिरणसलूजामहोदयः महाकविकालिदासः संस्कृतव्रती राष्ट्रीय पुरस्कारेण सम्मानितः कृतः। संस्कृतव्याकरणस्य प्राच्यविद्यायाश्च अन्तर्राष्ट्रिय- स्तरस्य प्रतिष्ठिता विदुषी प्रो. सरोजा भाटे (पुणे), संस्कृतव्याकरण- भाषाविज्ञान- संस्कृत- प्राकृत- भाषाणां प्रख्याताः विशेषाज्ञाः मिशिगन- विश्वविद्यालयस्य पूर्वप्राध्यापकाः प्रो. माधव देशपांडे (कैलिफोर्निया, अमेरिका) अस्वस्थताकारणात् समारोहे उपस्थातुं न शक्नुवन्। तयोः स्थाने क्रमशः प्रो. कविताहोले, प्रो. देशपांडेमहोदयस्य भगिनी डॉ. माणिकठाकरा पुरस्कारं गृहीतवत्यौ।
वरिष्ठसंस्कृतविद्वच्छ्रेण्यां संस्कृतपत्रकारिता- भारतीयज्ञानपरम्परा- प्राच्यविद्याक्षेत्रेषु अतुलनीय- योगदानाय प्रख्याताः संस्कृतविद्वांसः नन्दकिशोरपत्तरकिने महोदयाः, संस्कृतस्य सुप्रसिद्धाः विद्वांसः प्रो. कालुरी हनुमंत राव (सिकन्दराबादः) तथा च भारतीयदर्शनशास्त्रस्य विशेषाज्ञाः प्रो. कृष्णकांतशर्मा महाकविकालिदासः संस्कृतव्रती राष्ट्रीय पुरस्कारेण सम्मानिताः अभवन्। युवासंस्कृतविद्वच्छ्रेण्यां प्रख्याताः युवाविद्वांसः डॉ. रामकृष्णपेजत्ताय (चाणक्य- विश्वविद्यालयः, बेङ्गलूरु), विख्याताः वेदभाष्यकाराः भारतीयदर्शनशास्त्रस्य मर्मज्ञाः पूर्णप्रज्ञपाठशाला बेङ्गलूरु इत्यस्याः निदेशकाः प्रो. वीरनारायणपांडुरंगी, संस्कृतप्रचारप्रसारस्य अग्रणी कार्यकर्त्तारश्च 'संभाषणसंदेशः' पत्रिकायाः सम्पादकाः डॉ. सचिनकठाळे (नागपुरम्) महोदयाः महाकवि कालिदास संस्कृतव्रती राष्ट्रीय पुरस्कारं प्रापन्। अस्य पुरस्कारस्य अन्तर्गतम् अन्तर्राष्ट्रिय- संस्कृतविद्वच्छ्रेण्याः, वरिष्ठसंस्कृतविद्वच्छ्रेण्याः प्रत्येकस्मै पुरस्कारविजेत्रे ₹५०,००० (पञ्चाशत्सहस्ररूप्यकाणि) पुरस्कारराशिः, सम्मानपत्रं, शालवस्त्रं, श्रीफलं च प्रदत्तं, यदा च युवासंस्कृतविद्वच्छ्रेण्याः प्रत्येकस्मै पुरस्कारविजेत्रे ₹२५,००० (पञ्चविंशतिसहस्ररूप्यकाणि) पुरस्कारराशिः, सम्मानपत्रं, शालवस्त्रं, श्रीफलं च प्रदाय पुरस्कृतं कृतम्।पुरस्कारप्राप्तेषु विद्वत्सु नन्दकिशोरपत्तरकिने, डॉ. माणिकठाकरा, प्रो. कृष्णकांतशर्मा, आचार्यवीरनारायणपांडुरंगी, डॉ. रामकृष्णपेजत्ताय महोदयाः स्वकीयान् विचारान् प्रकटितवन्तः।
विशिष्टातिथिः प्रो. गणपतियादवः स्वकीये आशीर्वचने अवदत् यत् कालिदासदिवसस्य उपलक्षणे एतादृशैः प्रतिष्ठितैः विद्वद्भिः सह एकत्र मेलनम् तस्य कृते अत्यन्तं हर्षस्य विषयः अस्ति। तेन परामर्शः दत्तः यत् विदुषाम् इव एषः प्रतिष्ठितः पुरस्कारः युवकविभ्यः अपि प्रारब्धव्याः। मुख्यअतिथिः डॉ. पंकजचान्दे अवदत् यत् कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः तत्कालीन- जिलाधिकारी- मनुकुमारश्रीवास्तवस्य तथा च बैद्यनाथसंस्थायाः डॉ. सुरेशशर्मा महोदयस्य सहयोगात् आर्थिकसमर्थनात् च अस्य पुरस्कारस्य आरम्भं कृतवान् आसीत्। तेन प्रोक्तं यत् अद्य एतेषां नवानां विदुषां सम्माननं कुर्वन् विश्वविद्यालयः स्वयमेव धन्यताम् अनुभवति। तेन सर्वान् संस्कृतविश्वविद्यालयान आग्रहितं यत् ते वैदेशिक-छात्रेभ्यः आङ्ग्लमाध्यमेन संस्कृतशिक्षणं प्रारभन्ताम्, येन संस्कृतम् अध्येतुम् इच्छुकानां वैदेशिकविद्यार्थिनाम् आकर्षणं संस्कृत- विश्वविद्यालयान् प्रति वर्धेत। यदि संस्कृतं वैश्विकस्तरे परिचयं प्रापयितुं मार्गः प्रशस्तः करणीयः, तर्हि संस्कृतशिक्षकेषु आङ्ग्लमाध्यमेन अध्यापनस्य क्षमता विकसिता करणीया भविष्यति अस्यां दिशि च सर्वैः संस्कृतविश्वविद्यालयैः गम्भीराः प्रचेष्टाः करणीयाः।
अध्यक्षीयोद्बोधने कुलगुरवः डॉ. अतुलवैद्यमहोदयाः प्रतिपादितवन्तः यत् तेषाम् इच्छा वर्तते यत् कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः वैश्विकस्तरे एकः प्रतिष्ठितः संस्थानरूपेण स्थापितः भवेत्, वारङ्गापरिसरः पुनः नालन्दा इव गौरवशालिन्याः शैक्षणिकपरम्परायाः केन्द्रं जायेत। तेन प्रोक्तं यत् अस्य उद्देश्यस्य पूर्तये विश्वविद्यालयः निरन्तरं प्रयतते। तेन एतदपि कथितं यत् अद्य सम्मानिताः सर्वे विद्वांसः भारतस्य अमूल्या बौद्धिकी निधिः सन्ति तेषां सम्माननं च विश्वविद्यालयस्य कृते गौरवस्य सौभाग्यस्य च विषयः अस्ति। प्रत्येकं विद्वान् स्व-स्वशास्त्रस्य प्रकाण्डज्ञाता वर्तते। भारतीयज्ञानपरम्परायाः संवर्धने तेषां योगदानम् अत्यन्तं महत्त्वपूर्णं प्रेरणादायी च अस्ति। ते सर्वान् पुरस्कारविजेतॄन् हार्दाः वर्धापनाः वितरितवन्तः।
कार्यक्रमस्य प्रभावी विद्वत्तापूर्णञ्च सञ्चालनं डॉ. सुमितकठाळे महोदयेन विहितं कुलसचिवेन डॉ. रोशनअलोने महोदयेन च सर्वेषाम् आभारः प्रकटितः